दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-6 ■ वर्ष-5 ■ अङ्क-69 | 1 | दिसम्बर 31, 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com


**पञ्चाङ्गम्**

अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शरद-ऋतुः
सूर्यः दक्षिणायनम् पौषशुक्लत्रयोदशी
पौषः 16 प्रविष्टांशः मङ्गलमयः भवेत्


2 Shimla Winter Festival २०२५: मंडीजनपदस्य प्रियङ्कायाः शिरसि विराजितः 'मिसविन्टरक्वीन' मुकुटः, कनिष्का नेहा च उपविजेत्र्यौ

3 Himachal Weather: नववर्षे हिमाचलप्रदेशस्य ऋतुपरिवर्तनम् आकर्षणं भविष्यति, अखिले प्रदेशे हिमवृष्टेः वर्षायाश्च सम्भावना

6 संस्कृतभारत्याः काशीप्रान्तस्य प्रबोधनवर्गस्य समापन-दीक्षान्तकार्यक्रमः सुसम्पन्नः जातः


## अर्थक्षेत्रविशेषज्ञैः सह उपवेशनम् अकरोत् प्रधानमन्त्री नरेन्द्रमोदी



**हिमसंस्कृतवार्ताः** - प्रधानमन्त्री नरेन्द्रमोदी नीति-आयोगे आगामी वर्षस्य आय-व्यय संकल्पना-पत्रम् आलक्ष्य देशस्य अर्थक्षेत्रविशेषज्ञैः सह उपवेशनम् अकरोत्। इदम् उपवेशनम् अर्थिकक्षेत्रविशेषज्ञाणां विचारानुभवानाम् आधारेण वर्तमानार्थिक स्थितिम् अवलोक्य भावि संभावनायै अवर्तत। अस्मिन् उपवेशने विकासं समेधितुं दोषनिवृत्तये च विचारविमर्शो विहितः। नीति आयोगे विहिता परिचर्चा प्रशासनाय भावियोजना निर्माणे साहाय्यं प्रदास्यति।

## बांग्लादेशस्य पूर्व-प्रधानमन्त्री खालिदा जिया इत्यस्याः निधनम्




**हिमसंस्कृतवार्ताः** - बांग्लादेशस्य पूर्व-प्रधानमन्त्री बीएनपी इति दलस्य अध्यक्षा खालिदा जिया ढाकायां पंचत्वे निलीना। प्रधानमन्त्री नरेन्द्रमोदी तस्याः निधने शोकं प्रकटितवान्। खालिदा जिया अशीति-वर्षीया आसीत्। एकस्मिन् सामाजिकसंचार-पटले बीएनपी इति दलेन लिखितं यत् प्रशासनेतर-चिकित्सालये सा उपचर्यमाणा आसीत्।

## श्रीनारायणगुरोः शिक्षा भविष्याम् अपि जनानान् प्रेरयिष्यति - उपराष्ट्रपतिः



**हिमसंस्कृतवार्ताः** - उपराष्ट्रपतिः सी.पी.राधाकृष्णनः अवोचत् यत् श्रीनारायणगुरोः शिक्षा भविष्याम् अपि जनानान् प्रेरयिष्यति। उपराष्ट्रपतिः केरलस्य वरकालायां त्रिनवतितमायाः शिवगिरि तीर्थयात्रायाः उद्घाटनावसरे वदति स्म। इतः प्राक् केरलस्य तिरुवनंतपुरम-नगरे मार इवोनियोस इत्याख्यास्य स्वायत्त महाविद्यालयस्य हीरकजयन्त्यवसरे उपराष्ट्रपतिः अवोचत् यत् शिक्षा विकसित भारतनिर्माणे निर्णायक भूमिकां निभालयति।

# "परीक्षा पे चर्चा" इत्यस्य ९ तमे प्रकरणे २.९२

## कोट्याधिकाः छात्राः, शिक्षकाः, अभिभावकाः च पञ्जीकरणं कृतवन्तः




"परीक्षा पे चर्चा" इत्यस्य ९ तमे प्रकरणे २.९२ कोट्याधिकाः छात्राः, शिक्षकाः, अभिभावकाः च पञ्जीकरणं कृतवन्तः। आगामिवर्षे जनवरीमासे एषः कार्यक्रमः भविष्यति। "परीक्षा पे चर्चा" इत्यस्य समये भारतात् विदेशेभ्यः च छात्राः, अभिभावकाः, शिक्षकाः च प्रधानमन्त्रिणा सह परीक्षा अवसादस्य विषये चर्चां करिष्यन्ति। ६ तः १२ कक्षापर्यन्तं छात्राः, शिक्षकाः, अभिभावकाः च भागं ग्रहीतुं योग्याः सन्ति । MyGov मञ्चे जनवरी ११ दिनाङ्कपर्यन्तं पञ्जीकरणं कर्तुं शक्यते।

## जल-जीवन-अभियानस्य अन्तर्गतं सेवा-वितरणस्य सामुदायिक-स्वामित्वस्य च सुदृढीकरणाय जल-सेवा-मूल्याङ्कनम् उद्घाटितवान्

# केन्द्रीय-जलशक्ति-मन्त्री सी. आर. पाटिलः



**हिमसंस्कृतवार्ता-** केन्द्रीय-जलशक्ति-मन्त्री श्री सी.आर.पाटिलः जल-जीवन-अभियानस्य अन्तर्गतं सेवा-वितरणस्य सामुदायिक स्वामित्वस्य च सुदृढीकरणाय जल-सेवा-मूल्याङ्कनं वर्चुअल-माध्यमेन उद्घाटितवान्। जलशक्ति-मन्त्रालयेन उक्तं यत् जल-सेवा-मूल्याङ्कनं जल-जीवन-अभियान-पटले ग्राम-पञ्चायत-नेतृत्वे डिजिटल-पेयजल-सेवा-कार्यक्षमता-मूल्याङ्कनस्य साधनं वर्तते। एतत् समुदाय-स्वामित्वस्य स्व-मूल्याङ्कन रूपेण परिकल्पितम् अस्ति, यत् पुनरावर्तित-मूल्य-तृतीय-पक्ष-सर्वेक्षणेषु अवलम्बनात् परं ग्रामिण-स्वजल-सेवा-वितरण-व्यवस्थायाः विषये सामूहिक चिन्तनाय साहाय्यं करिष्यति। अग्रिमे वर्षे जनवरी-मासस्य षड्विंशतितमे दिनाङ्के "हर-घर-जल" इति योजना ग्रामणेषु प्रापयेत इति अपेक्ष्यते। अस्मिन् अवसरे श्री पाटिलः अवदत् यत् जल-सेवा-मूल्याङ्कनेन ग्राम-पञ्चायत०१०ः जलापूर्ति-व्यवस्थायाः संरक्षकाः भवितुं समर्थाः भविष्यन्ति। येन ग्राम-सभायाः माध्यमेन लोकतान्त्रिक-निर्णय-प्रक्रियायाः सुदृढीकरणे साहाय्यं भविष्यति।

## सुभाषितम्

**तृणानि नोन्मूलयति प्रभञ्जनो, मृदूनि नीचैः प्रणतानि सर्वतः।
स्वभाव एवोन्नतचेतसामयं, महान्महत्स्वेव करोति विक्रमः॥**

अर्थात्- जिस प्रकार से प्रचण्ड आंधी बड़े बड़े वृक्षों को जड़ से उखाड़ देता है किन्तु छोटे से तृण को नहीं उखाड़ता, उसी प्रकार पराक्रमीजन अपने बराबरी के लोगों पर ही पराक्रम प्रदर्शित करते हैं और निर्बलों पर दया करते हैं।



दैनिक ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263



सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य समुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्


# पञ्चविंशत्यधिक-द्विसहस्रतमवर्षं जीवनात्मककार्यस्य च सौविध्याय शासनात्मक परिष्काराय च समर्पितम् अस्ति - डॉ. जितेन्द्र सिंहः



**हिमसंस्कृतवार्ताः** - कार्मिक-लोक-परिवाद-निवृत्तिवेतन-राज्यमन्त्री डॉ. जितेन्द्र सिंहः अवदत् यत् पञ्चविंशत्यधिक-द्विसहस्रतमवर्षं जीवनात्मककार्यस्य च सौविध्याय शासनात्मक परिष्काराय च समर्पितम् अस्ति। नवदेहल्यां वर्षान्त-वार्ताहर-सम्मेलनं सम्बोधयन् मन्त्री अवदत् यत् नागरिक-जीवनस्य सुगमतां सुनश्चेतुं सेवाप्रदातृणां कार्य-सौकर्यस्य सुनिश्चितिः अनिवार्या अस्ति। मन्त्रिणा वृत्ति-मेलापकं केन्द्रीकृत-सार्वजनिक-अभियोग-निवारण-निरीक्षण-व्यवस्था इत्यादीनां विभागानां प्रमुखोपक्रमाणाम् उपलब्धीनां विषये अवधानं दत्तम्। कार्मिक-प्रशिक्षण विभागस्य सचिवः रचना-शाहः अवदत् यत् पञ्चविंशत्यधिक-द्विसहस्रतमे वर्षे त्रयः राष्ट्रियणजीविकोत्सवाः आयोजिताः। येषु विभिन्नैः मन्त्रालयैः विभागैश्च प्रायः सार्ध-लक्षं नियुक्ति-पत्राणि वितरितानि। संघ लोक सेवा आयोगस्य प्रतिभा-सेतु-अभियानस्य उल्लेखं कुर्वन् सः सूचितवान् यत् त्र्यशीत्यधिक-द्विसहस्र-संस्थानां कृते त्रयोदश-सहस्रादधिकानाम् अनुशंसित-अभ्यर्थिनां विवरणानि उपलभ्यन्ते, अथ च एकसप्तत्यधिकचतुर्शतम् अभ्यर्थिभ्यः नियुक्ति-पत्राणि प्रदत्तानि।

# मोदीयुगे आर्थिकसशक्तिकरणम् : अटलकन्दरया परिवर्तितं लाहौलस्य जनजातीयक्षेत्रस्य पर्यटनस्य चित्रम्




**हिमसंस्कृतवार्ताः - कार्यालयीयः प्रतिनिधिः।**
मनाली-नगरात् लाहौल-उपत्यकां सम्बद्धा विश्वस्य दीर्घतमः आन्तर्भौमिकराजमार्गः अटल-कन्दरा शीत-मरुभूमिः इति प्रसिद्धायां हिम-आच्छादित-लाहौल-उपत्यकायां पर्यटनस्य परिवर्तनं कृतवती। एषा सूचना राज्यसभासांसदप्रोफेसर (डॉ.) सिकंदरकुमारेण लिखिते **"मोदीयुगे आर्थिकसशक्तिकरणम्"** इति पुस्तके प्रदत्ता अस्ति, यत् गतसप्ताहे उपराष्ट्रपतिना सी.पी. राधाकृष्णन इत्यनेन विमोचितम्। पुस्तके उक्तं यत् अटलकन्दरा द्वारा लाहौले वर्षपर्यन्तं पर्यटनस्य ऋतुः आरब्धा, येन उपत्यकायाः सामाजिक-आर्थिक-स्थितौ क्रान्तिः अभवत्।प्रतिमासं समासे एकलक्षं पर्यटकाः कन्दरां लङ्घयन्ति । एषा कन्दरा लाहौल-क्षेत्रस्य आर्थिक-उत्प्रेरकरूपेण कार्यं करोति, तथैव सशस्त्रसेनानां कृते लद्दाखं प्रति वैकल्पिकं प्रवेशमार्गं अपि प्रददाति । सीमामार्गसङ्घटनेन २०२० तमे वर्षे ₹३,२०० कोटिरूप्यकाणां व्ययेन सम्पन्नस्य अस्य आन्तर्भौमिकराजमार्गस्य कारणेन मनाली-केलाङ्गयोः कुलदूरता ११६ किलोमीटरतः ७१ किलोमीटरपर्यन्तं, मनाली-लेहयोः मध्ये ४६ किलोमीटर न्यूनं जातम्। एतत् लाहौल-लद्दाख, सीमाक्षेत्रयोः मध्ये सैन्यरसदस्य पर्यटनसम्बद्धतायाः च सुविधां करोति, येन लाहौल-लेहयोः अर्थव्यवस्थाः वर्धते विश्वस्य अभिलेखपुस्तके १०,००० पादतः उपरि दीर्घतमा कन्दरारूपेण मान्यताप्राप्तस्य अटलकन्दरायाः विश्वस्य केचन उत्तमाः उन्नतसुरक्षाप्रणाल्याः सन्ति, येषु वायुप्रवाहः, आपत्कालीननिष्कासनकन्दराः, अग्निनियन्त्रणप्रणाली, निरन्तरवायुगुणवत्तानिरीक्षणं च सन्ति संसदसदस्यः प्रो. (डॉ.) सिकंदरकुमारः *"मोदीयुगे आर्थिकसशक्तिकरणम्*" इति लिखति यत् दुर्गमपर्वतक्षेत्रेषु सामान्यजनस्य प्रवेशस्य सुविधायै पर्वतमाला रज्जूमार्ग- कार्यक्रमः आगामिषु पञ्चवर्षेषु १,२०० किलोमीटरव्यासस्य २५० तः अधिकाः रज्जूमार्ग-परियोजनाः विकसितं करिष्यति, यस्य मूल्यं ₹१.२५ कोटिरूप्यकाणि भविष्यति। पर्वतमाला रज्जूमार्गकार्यक्रमस्य अन्तर्गतं हिमाचले पर्यावरणसौहृदं, दर्शनीयं, सुलभं च यात्रां कर्तुं विश्वस्तरीयप्रौद्योगिक्याः उपयोगेन ₹३,२३२ कोटिरूप्यकाणां व्ययेन कुल ५७.१ किलोमीटर् व्यासस्य सप्त रज्जूमार्गपरियोजनानां निर्माणं भविष्यति १३.५ किलोमीटरदीर्घस्य पालमपुर-थात्री-छुंजा -हिमशैल-रज्जुमार्गस्य मूल्यं ₹६०५ कोटिरूप्यकाणि भविष्यति । सिरमौर-मण्डलस्य ८ किलोमीटर्-दीर्घस्य शिरगुल-महादेव-मन्दिर-चूड़धार-मार्गस्य व्ययः ₹२५० कोटिरूप्यकाणां भविष्यति, तथा च बिलासपुरमण्डलस्य ३ किलोमीटर्-दीर्घस्य लुहनु-बन्दला-मार्गस्य मूल्यं ₹१५० कोटिरूप्यकाणां व्ययः भविष्यति, हिमानीतः चामुण्डा (काङ्गड़ा)पर्यन्तं ६.५ किलोमीटर् व्यासस्य मार्गस्य निर्माणं भविष्यति, यस्य व्ययः ₹२८९ कोटिरूप्यकाणां भविष्यति । बिजलीमहादेवमन्दिरात् (कुल्लू) ३.२ किलोमीटर् दूरे मार्गे ₹२०० कोटिरूप्यकाणां व्ययः भविष्यति । भरमौरतः भरमाणीमातामन्दिरपर्यन्तं २.५ किलोमीटर् व्यासस्य मार्गस्य मूल्यं ₹१२० कोटिरूप्यकाणि भविष्यति। किल्लाड़ात्- साच-दर्रा (चम्बा) यावत् २०.४ किलोमीटर्-पर्यन्तं मार्गस्य मूल्यं ₹१,६१८ कोटिरूप्यकाणि भविष्यति ।

### पुस्तके पर्वतीयराज्यानां विकासस्य चित्रं प्रस्तुतम्

पुस्तके उक्तं यत् प्रधानमन्त्रिणा नरेन्द्रमोदी इत्यनेन डिजिटलसंपर्कस्य विषये ग्रामाः नगरैः सह सममूल्याः कृताः, हिमाचलप्रदेशादिपर्वतीयराज्यानां विशेषतया लाभः अभवत्। २०१५ तः २०२१ पर्यन्तं ग्रामीणेषु अन्तर्जालप्रवेशः २०० प्रतिशतं वर्धितः अस्ति । २०२४ तमे वर्षे ९५.१५ प्रतिशतं ग्रामेषु अन्तर्जालस्य उपयोगः भविष्यति, अधुना प्रायः ४० कोटिग्रामीणजनाः अन्तर्जालस्य उपयोगं करिष्यन्ति देशस्य ९५४.४० मिलियन अन्तर्जाल-उपयोक्तृणां मध्ये ३९८.३५ मिलियनं ग्राम्यक्षेत्रेषु निवसन्ति । भारतनेट् परियोजनया २,१३,००० ग्रामपंचायताः ऑप्टिकल् फाइबर-संपर्केण सम्बद्धाः सन्ति । ग्राम्यक्षेत्रेषु विगतत्रिषु वर्षेषु मोबाईलव्यवहारः २००% अधिकं वर्धितः अस्ति । पुस्तके उक्तं यत्, २०२३ तमस्य वर्षस्य सितम्बर्-मासस्य १७ दिनाङ्के आरब्धा पञ्चवर्षीया प्रधानमन्त्रिविश्वकर्मयोजना ₹१३,००० कोटिरूप्यकाणां व्ययेन ग्रामीणक्षेत्रेषु कौशलं परिष्कर्तुं क्रीडापरिवर्तकं सिद्धं भविष्यति। हिमाचलप्रदेशे प्रधानमन्त्री विश्वकर्मायोजनायाः अन्तर्गतं त्रिस्तरीयं प्रदर्शनं कृत्वा अद्यावधि १८३,२४५ अभ्यर्थीनां चयनं कृतम् अस्ति। चयनित अभ्यर्थिनः सूक्ष्म-लघु-मध्यम-उद्यम-मन्त्रालयस्य तकनीकीविशेषज्ञानाम् आर्थिकसहायतां प्रशिक्षणं च प्राप्नुवन्ति । शून्यबैङ्कशेषेण आरब्धस्य प्रधानमन्त्रिजनधनयोजनायाः अन्तर्गतं ५३१.३ मिलियनतः अधिकाः वित्तकोषसंख्याः उद्घाटिताः सन्ति, येषु ५५.६ प्रतिशतं महिलानां, ६६.६ प्रतिशतं ग्रामीणक्षेत्रेषु, अर्धनगरीयक्षेत्रेषु च अस्ति ग्रामीणपरिवारानाम् आर्थिकआवश्यकतानां कृते ओवरड्राफ्टरूपेण ₹२३००० कोटिभ्यः अधिकं वितरणं कृतम् अस्ति। हिमाचलप्रदेशे प्रायः २० लक्षं जनधनलेखाः सन्ति ।

# भारतं रिफॉर्म एक्सप्रेस इति दोषनिवृत्तिपथे अग्रेसरं वर्तते

### येन भारतं जगतः केन्द्रत्वं वर्तते -प्रधानमन्त्री नरेन्द्रमोदी




**हिमसंस्कृतवार्ताः** - प्रधानमन्त्री नरेन्द्रमोदी अवोचत् यत् भारतं रिफॉर्म एक्सप्रेस इति दोषनिवृत्ति पथे अग्रेसरं वर्तते। येन भारतं जगतः केन्द्रत्वं वर्तते। प्रधानमन्त्रिणा नरेन्द्रमोदिना ऐषमः 'रिफॉर्म एक्सप्रेस इति विषये सोशलमीडिया इति सामाजिकसञ्चार-पटले एको लेखः लिखितः। अस्मिन् लेखे शासनस्य तेषां सञ्चयी कार्याणां विवरणं प्रस्तुतं यैः शनैः शनैः बाधाः निराकृताः। श्रीमोदी अवदत् यत् पञ्चविंशत्युत्तर-द्विसहस्रतमे वर्षे भारतेन श्रमविधै व्यापार-सन्धौ ऊर्जायाम् अन्येषु क्षेत्रेषु च देशस्य विकासगाथा विश्वसनीयता स्थिरता दीर्घकालिक-विश्वासः च दृष्टिङ्गताः। प्रधानमन्त्री अवदत् यत् एते पदक्षेपाः सप्तचत्वारिंशदुत्तर-द्विसहस्रतम-वर्षं यावत् विकसितभारतनिर्माणे सहायकाः भविष्यति।

## संसदा वर्तमानावश्यकताः निध्याय मनरेगा योजनायाः न्यूनताः अपाकर्तुं विकसित भारत- जी राम जी विधेयक पारितम् - शिवराजसिंहचौहानः



**हिमसंस्कृतवार्ताः** - कृषि-कृषक-कल्याण-मन्त्री शिवराजसिंहचौहानः अवोचत् यत् संसदा वर्तमानावश्यकताः निध्याय मनरेगा योजनायाः न्यूनताः अपाकर्तुं विकसित भारत- जी राम जी विधेयक पारितम्। श्रीचौहानः मध्यप्रदेशस्य भोपालनगरे विकसितभारत रोजगार आजीविका गारंटी मिशन ग्रामीण इति योजनामालक्ष्य वार्ताहर-सम्मेलनं सम्बोधितवान्। विपक्षस्य योजनायाः नाम परिवर्तनारोपे तेनोक्तं यत् अतीतकाले यदा विपक्षी-दलानि प्रशासने आसन् तदा आजीविका-सम्बद्धानां योजनानां नामानि नैकधा परिवर्तितानि। श्रीचौहान०ः अवदत् यत् विकसित भारत-जी राम जी योजनानाम् इतोपि प्रभावपूर्णां विधातुं प्रधानमन्त्रिणः गति-शक्तिः अभियानेन सह संयोजिता।

## भारतीय जनता पार्टीति दलम् आगामि-वर्ष समपत्स्यमाने पश्चिम बङ्गाल-विधानसभा निर्वाचने बहुमतळेन प्रशासनं रचयिष्यति-अमितशाहः



गृहमन्त्रिणा अमित-शाहळेन तृणमूल कांग्रेस-दलस्य प्रशासने राज्ये व्याप्ताभ्यां भ्रष्टाचार-कुप्रशासनाभ्यां कारणळेन पश्चिमबङ्गालस्य विनाशारोपः समारोपितः। कोलकातायाम् श्रीशाहळेन तृणमूल कांग्रेसदलं सुरक्षायां विफलमिति समारोपितः। तेनोक्तं यत् पश्चिमबङ्गालस्य मुख्यमन्त्री ममता बनर्जी अवैधप्रवेशस्य समस्यायाः समाधान विफला वर्तते। गृहमन्त्री अवोचत् यत् भारतीय जनता पार्टीति दलम् आगामि-वर्ष समपत्स्यमाने पश्चिम बङ्गाल-विधानसभा निर्वाचने बहुमतळेन प्रशासनं रचयिष्यति।

# HP Cabinet Decisions - चिकित्साव्यवस्थां सुदृढ़ां कर्तुं विभिन्नपदानि पूरयितुं निर्णयः

# हिमाचलप्रदेशस्य चण्डीगढस्य च सीमावर्ती-शीतलपुरे विश्वस्तरीयनगरस्य निर्माणस्य अनुमोदनम्



**हिमसंस्कृतवार्ताः- शिमला।**
हिमाचलप्रदेशमन्त्रिमण्डलस्य सभा मुख्यमंत्रिणः सुखविंदरसिंहसुक्खोः अध्यक्षतायां राज्यसचिवालये मङ्गलवासरे सम्पन्ना। सभायां राज्यस्य सर्वेषु चिकित्सामहाविद्यालयेषु सहायकाचार्याणां ५३ पदानि विभिन्नवर्गेषु १२१ पदानि च पूरयितुं निर्णयः कृतः। एतेषु पदेषु अध्यापनम्, अशिक्षणसंकायः, सहायकचिकित्साकर्मचारिणः च सन्ति। तदतिरिक्तं मन्त्रिमण्डलेन सहायककर्मचारिणां नर्सिंगनीतेः अन्तर्गतं हिमाचलप्रदेशराज्यचयन-आयोगस्य हमीरपुरस्य माध्यमेन ६०० सहायककर्मचारिनर्सपदानां निर्माणस्य अनुमोदनं कृतम्। चिकित्साशास्त्रस्य डॉक्टरेट्, मेडिसिनस् मास्टरपदवीं च प्राप्तानां संकायवैद्यानां कृते मूलभूतवेतनस्य २० प्रतिशतं प्रोत्साहनं दातुं च सभायां निर्णयः कृतः।

## जलशक्तिविभागे ग्रामीणविकास-विभागे च रिक्तपदानि पूरयिष्यन्ते

जलशक्तिविभागे जॉबप्रशिक्षु, कनिष्ठ अभियंता (सिविल) इत्येतेषां ४० रिक्तस्थानानां पूरणाय अपि मन्त्रिमण्डलेन अनुमोदनं कृतम्। तदतिरिक्तं ग्रामीणविकासविभागे प्रत्यक्षनियुक्त्या १० खण्डविकासपदाधिकारिणः पदानि पूरयितुं अनुमोदनं दत्तम्। मन्त्रिमण्डलेन राज्ये १०० चिह्नितानां सीबीएसई-विद्यालयानाम् कृते समर्पितस्य उप-संवर्गस्य निर्माणस्य अपि अनुमोदनं कृतम्, यत्र नियुक्तिः, प्रशिक्षणं, कार्यकालः, कार्यप्रदर्शनमूल्यांकनमापदण्डाः च स्थापिताः सन्ति।

## सुखाश्रययोजनायां समावेशः

सभायां धर्मशालानगरस्य टोङ्ग-लेन-विद्यालये नामाङ्कनं कृत्वा अध्ययनं कुर्वतां बालकाकानां, येषां बालकानां द्वयोः वा एकस्य जीवितस्य मातापित्रोः दिव्याङ्गता ७० प्रतिशतं वा अधिकं वा अस्ति, तेषां बालकानां समावेशः मुख्यमन्त्री- सुख- आश्रययोजनायां करणीयः इति निर्णयः कृतः। सुख- आश्रययोजनायाः अन्तर्गतं येषां बालकानां एकः मातापिता मृतः, अपरः च बालकं त्यक्तवान्, तेषां बालकानां समावेशस्य अपि निर्णयः कृतः।

## नूतननगरं निर्मातुम् अनुमोदनम्

सभायां हिमाचलप्रदेशस्य चण्डीगढस्य च सीमायां शीतलपुरे विश्वस्तरीयस्य नगरस्य निर्माणस्य अनुमोदनं कृतम्। तदतिरिक्तं अचलसम्पत्क्षेत्राय गतिं प्रदातुं हिमाचलप्रदेशस्य अचलसम्पत्त्याः नियमः ३ (विनियमनविकासनियमाः, २०१७) संशोधनं कृत्वा अचलसम्पत्त्व्यापारे पारदर्शिताम् आनेतुं विवादनिराकरणं च शीघ्रं कर्तुं निर्णयः कृतः। मन्त्रिमण्डलेन ऊनामण्डलस्य पलक्वाहखासस्य भवनादिनिर्माण-कल्याणमण्डलस्य कौशलविकाससंस्थाभवनस्य उपयोगस्य प्रस्तावस्य अनुमोदनं कृतम्। अधुना एसडीआरएफ अस्मिन् परिसरे स्थानान्तरितः भविष्यति।

### हिमालयीयपशुचारकाणां सशक्तिकरणाय योजना-

सभायां हिमालयी पारिस्थितिकीतन्त्रेषु आजीविकायाः कृते पशुचारकाणां जीविकायाः (ईपीएस) कार्यक्रमस्य अन्तर्गतं शिथिलजीविकायाः, चरितपशूनां, हिमालयस्य पशुचारकाणां सशक्तिकरणस्य च परियोजनाप्रस्तावस्य अनुमोदनं कृतम्। परियोजनायाः उद्देश्यं आजीविका, ग्रामीण-अर्थव्यवस्थाः सुदृढाः, उच्च-उच्चक्षेत्रेषु पारिस्थितिकसन्तुलनं निर्वाहयितुम्, पशुपालनप्रथानां आधुनिकीकरणं, देशीजातीनां संरक्षणं, विपण्यसम्बद्धतां मूल्यवर्धनं च सुदृढं कर्तुं च अस्ति गोपालकानां तेषां पशुपालनानां च सुचारुरूपेण गमनस्य सुविधायै नूतनं विधानं प्रवर्तयिष्यते, सर्वा वनभूमिः तृणभूमिः च गोपालकानां कृते उद्घाटिता भविष्यति।

## दुग्धप्रसंस्करण-संयंत्राणां स्थापना-

दुग्धसंघेन तथा राष्ट्रियदुग्धविकासमण्डलेन नाहनं, नालागढः, मोहलः, रोहड़ू इत्यत्र दुग्धप्रसंस्करणसंयन्त्राणि, हमीरपुरमण्डलस्य जलाड़ीस्थाने दुग्धशीतलनकेन्द्रम्, ऊनामण्डले झलेड़ायां प्रचुरदुग्धशीतकम्, करसोगे पाङ्गीक्षेत्रे एतादृशी अधोसंरचनायाः स्थापनायाः निर्णयः कृतः। तथैव आधारभूतसंरचनानां स्थापनायाः निर्णयः कृतः। तदतिरिक्तं २०२५-२६ तथा २०२६-२७ मध्ये दुग्धक्रयणव्ययस्य वर्धनस्य कारणेन हिमाचलप्रदेशमिल्कफेड लिमिटेड इत्यस्य कार्यपुञ्जस्य आवश्यकतां पूरयितुं ₹६० कोटिरूप्यकाणां नकदऋणसीमायाः अनुमोदनं कृतं दुग्धक्रयणार्थं कृषकाणां नियमितरूपेण भुक्तिः सुनिश्चित्य दुग्धोपकरस्य कृते पृथक् कोषः उद्घाटितः भविष्यति।

## बिलासपुरस्य घुमारवींस्थाने सार्वजनिक- निजी-सहभागितायां विश्वविद्यालयस्य स्थापना

सभायां प्राविधिकशिक्षानिदेशालयस्य अन्तर्गतं पञ्चसु अपि सर्वकारीय- इञ्जिनीयरिङ्ग- महाविद्यालयेषु अनुप्रयुक्तविज्ञान- मानवविज्ञानयोः सहाचार्याणां सहायक-आचार्याणां च पदानि कार्यात्मकरूपेण विनिमययोग्यं कृत्वा कार्यात्मक- समतुल्यता-प्रतिरूपस्य (FEM) स्वीकरणस्य अनुमोदनं कृतम्। कार्यात्मकम् आदानप्रदानं स्थानान्तरणं वा प्रतिनियुक्तिः वा न मन्यते, तथा च सर्वेषां विद्यमानानाम् अनुमोदितपदानां शैक्षणिकसमूहः निर्मितः भविष्यति। तदतिरिक्तं डिजिटलरूपेण कुशलं उद्यमशीलं च कार्यबलं पोषयितुं बिलासपुरमण्डलस्य घुमारवींस्थाने सार्वजनिक- निजी- सहभागितायाः आधारेण नवीनताकौशल-प्रौद्योगिकी, उद्यमशीलता-अनुसन्धान- विश्वविद्यालयस्य बहुविषयकसंस्थायाः स्थापनायै अनुमोदनं दत्तम्।

## हिमाचलप्रदेशभूमिसंरक्षणविधानम्-१९७८ इत्यस्मिन् संशोधनम्

मन्त्रिमण्डलेन हिमाचलप्रदेशभूमिसंरक्षणविधानम्, १९७८ इत्यस्मिन् संशोधनस्य प्रस्तावः अनुमोदितः। अस्य अन्तर्गतं प्राकृतिकविपत्तिभिः, रोगैः, कीटप्रकोपैः इत्यादिभिः शुष्कभद्रदारुवृक्षाः (सूखे चीड़ के पेड़) सक्षमप्राधिकरणस्य अनुमोदनं प्राप्य छेदयितुं शक्यन्ते। मन्त्रिमण्डलेन राजीवगान्धी लघु-आपणसुखकल्याण योजना- नगरीयसंशोधनमपि अनुमोदितम्। अस्य अन्तर्गतं वित्तकोषैः एनपीएघोषिताणां लघु-आपणिकाणां द्विलक्षरुप्यकाणि यावति व्यावसायिकऋणेषु राज्यसर्वकारः एकलक्षरुप्यकाणां एकवारं निस्तारणसहायतां प्रदास्यति। मन्त्रिमण्डलेन हिमाचलप्रदेश- राज्यपिछड़ावर्गायोगस्य मुख्यालयस्य शिमलातः काङ्गड़ामण्डलस्य धर्मशालायां स्थानान्तरणाय अनुमोदनं कृतम्। काङ्गड़ामण्डलस्य इन्दौराक्षेत्रस्य मलौटे मादकद्रव्यनिवृत्तिकेन्द्रस्य स्थापनायाः अपि मन्त्रिमण्डलेन अनुमोदनं कृतम्। तदतिरिक्तं मुख्यमन्त्री सार्वजनिकभवनयोजनायाः अन्तर्गतं कस्मिन् अपि विधानसभाक्षेत्रे निर्माणाधीनसार्वजनिकभवनानां कृते आवश्यकान् अनुग्रहान् प्रदातुं मन्त्रिमण्डलेन अनुमोदनं कृतम्।

### स्वर्णजयन्ती ऊर्जानीति-२०२१ इत्यत्र संशोधनस्य अनुमोदनम्

मन्त्रिमण्डलेन स्वर्णजयन्ती ऊर्जानीति-२०२१ संशोधनस्य अनुमोदनं कृतम्। अस्य अनुसारं न्यूनीकृतदरेण अर्थात् १२% निःशुल्कविद्युत्, १% स्थानीयक्षेत्रविकासनिधिना निःशुल्क- विद्युत्स्वत्व-शुल्कसंग्रहणात् अतिवर्तनम् (छूट) २५ मेगावाटपर्यन्तं क्षमतायुक्तासु परियोजनासु अपि विस्तारितः भविष्यति, येषां कृते कार्यान्वयनसहमतयः पूर्वमेव हस्ताक्षरिताः सन्ति। एतद् अतिवर्तनम् तासु परियोजनासु न प्रवर्तते, येषां विद्युत्क्रयणसहमतिः पूर्वमेव हिमाचलप्रदेश-राज्यविद्युत्मण्डलसीमितः इत्यनेन सह निष्पादिताः सन्ति। अपि च, पूर्वमेव आज्ञापितासु परियोजनासु एतद् अतिवर्तनम् न प्रवर्तते। मन्त्रिमण्डलेन नाथपा झाकड़ी, रामपुरं जलविद्युत् परियोजनासु च एसजेवीएन इत्यस्य इक्विटीभागस्य पुनर्विनियोगः हिमाचलप्रदेशसर्वकाराय, ऊर्जानिदेशालयस्य हिमाचलप्रदेशस्य माध्यमेन विक्रयणार्थं च अनुमोदनं कृतम्। मन्त्रिमण्डलेन शिक्षाविभागे करुणाकारणात् २८ आश्रितानां जीविकायाः अनुमोदनम् अपि कृतम्।मन्त्रिमण्डलेन बिलासपुरमण्डलस्य घुमारवींक्षेत्रे स्थितेषु मोहलमौजापनोलशाहरी- औहरक्षेत्रेषु आधुनिक-व्यापारिक- सङ्कुलनिर्माणस्य अनुमोदनं कृतम्। मन्त्रिमण्डलेन हिमाचलप्रदेशस्य आपदाशमनं तत्परता च परियोजनां फ्रांस् विकाससंस्थायाः साहाय्येन पञ्चवर्षपर्यन्तं ₹८९२ कोटिरूप्यकाणां व्ययेन अनुमोदनं कृतम्। राजीवगान्धी स्वरोजगारप्रारम्भयोजनायाः अन्तर्गतं स्टेजकैरिजसेवारूपेण संचालनार्थं १८ तः ४२ आसनक्षमताबसयानानां क्रयणार्थं मन्त्रिमण्डलेन अनुदानम् अनुमोदितम्।

# हिमाचलप्रदेश-विद्यालयीयशिक्षा-मण्डलम् २,३९० परीक्षा-केन्द्रेषु दशमी-द्वादशीकक्षयोः वार्षिकपरीक्षाः आयोजयिष्यति

## सर्वाणि परीक्षा-केन्द्राणि सीसीटीवी-यन्त्रैः पूर्णतया युक्तानि भविष्यन्ति

हिमसंस्कृतवार्ताः - डॉ पद्मनाभः, धर्मशाला। हिमाचलप्रदेश-विद्यालयीयशिक्षा-मण्डलम् धर्मशाला अस्मिन् सत्रे दशमी-द्वादशीकक्षयोः वार्षिकपरीक्षाः २,३९० परीक्षा-केन्द्रेषु आयोजयिष्यति। सर्वाणि परीक्षा-केन्द्राणि सीसीटीवी-यन्त्रैः पूर्णतया युक्तानि भविष्यन्ति।

येषां निरीक्षणं मण्डलस्य मुख्यालयात् अपि कर्तुं शक्यते। परीक्षाः तृतीयमार्चतः प्रभृति प्रातः दशवादनात् मध्याह्न एकवादनपर्यन्तं भविष्यन्ति।

एतासां परीक्षाणां कृते विद्यालयीयशिक्षा-मण्डलेन परीक्षा-समयसूची अपि प्रकाशिताऽस्ति। तस्मिन्नेव काले मण्डलेन परीक्षा-सज्जताः आरब्धाः सन्ति। दशमी-द्वादशीकक्ष्योः

वार्षिकपरीक्षाकाले पादोनद्विलक्षाधिकाः विद्यार्थिनः परीक्षायां उपवेक्ष्मन्ति। विद्यार्थिनां दीर्घयात्रा न भवेत्, इति कारणेन अस्मिन् वर्षे परीक्षा-केन्द्राणां संख्या वर्धिता अस्ति। गतवर्षे आयोजितासु मण्डल-परीक्षासु प्रायः २,३०० परीक्षा-केन्द्राणि आसन्। अस्मिन् वर्षे तु मण्डलेन अधिकानि परीक्षा-केन्द्राणि निर्मिताणि सन्ति। परीक्षा-केन्द्रेषु उड्डयन-दलैः सह मण्डल-मुख्यालयात् ऑनलाइन-निरीक्षणमपि क्रियते। परीक्षासम्बद्धाः सर्वाः सज्जताः मण्डलेन आरब्धाः सन्ति।अस्मिन् विषये मण्डल-सचिवः डॉ. मेजर् विशाल् शर्मा अवदत् यत् अस्मिन् वर्षे परीक्षा-केन्द्राणां संख्या वर्धिता अस्ति। सः अवदत् यत् वार्षिकपरीक्षाणां कृते अद्यावधि २,३९० परीक्षा-केन्द्राणां सङ्घटनं कृतम् अस्ति।

## पीएचडी प्रवेश-प्रक्रिया ३१ दिसम्बरपर्यन्तं अवश्यं सम्पन्ना करणीया

हिमाचलप्रदेश-विश्वविद्यालये (एचपीयू) शैक्षणिकसत्रस्य २०२५–२६ पीएचडी-प्रवेश-प्रक्रिया अग्रिमचरणं प्राप्ता अस्ति। विश्वविद्यालय-प्रशासनेन विविध-विभागेषु पीएचडी-कार्यक्रमाणां कृते प्रान्तीय-श्रेणी-अन्तर्गत- चयनित-अभ्यर्थिनां सूची प्रकाशिताऽस्ति। एषा सूची विश्वविद्यालयस्य आधिकारिक-जालस्थले स्थापिता अस्ति। तदनन्तरं शेष-विभागेषु काउंसलिङ्ग-प्रक्रिया ३० तथा ३१ दिसम्बरे अनिवार्यतया पूर्णीकरणीयेत्यादेशः दत्तः अस्ति।

सूच्यानुसारं अन्तरविषयक-विभागे (आईवीएस) द्वौ प्रान्तीय-अभ्यर्थिनौ पीएचडी-प्रवेशं प्राप्तवन्तौ। भूगोल-विभागे एकः, शारीरिकशिक्षा-विभागे त्रयः, रसायन-विज्ञान-विभागे त्रयः, प्रबन्धन-विभागे षट् प्रान्तीय-अभ्यर्थिनः चयनिताः सन्ति। विश्वविद्यालयस्य अध्ययन-डीन-कार्यालयेन सर्वे शिक्षण-विभागाः संस्थानानि च निर्देशितानि यत् पीएचडी-प्रवेशसम्बद्धा काउंसलिङ्ग-चयन-प्रक्रिया वर्षान्ते अवश्यं पूर्णीकरणीया। येषु विभागेषु अद्यावधि काउंसलिङ्ग न जाता, तत्र ३० तथा ३१ दिसम्बरे प्रक्रिया आयोजयिष्यते। प्रशासनस्य स्पष्टो निर्देशः अस्ति यत् निर्धारित-समयानन्तरं प्रवेश-प्रक्रिया कस्यापि स्तरस्य लंबिता न भवेत्। तथापि केचन विभागाः अपि दृश्यन्ते, येषु काउंसलिङ्ग-प्रक्रिया पूर्णा जाता, किन्तु अन्तिमा वरीयता-सूची अद्यावधि जालस्थले न प्रकाशिताऽस्ति। अनेन बहवः अभ्यर्थिनः संशयावस्थायां स्थिताः सन्ति। प्रशासनः सम्बन्धित-विभागान् शीघ्रं चयन-सूची जालस्थले अद्यतनं कर्तुं निर्देशितवान् अस्ति।

## सोमवासरे आङ्ग्लभाषायाः परामर्शः सम्पन्नः

सोमवासरे आङ्ग्लभाषा-, हिन्दी- तथा पर्यटन-अध्ययन-विभागेषु पीएचडी-प्रवेशस्य कृते काउंसलिङ्ग-प्रक्रिया आयोजिता। एतेषु विभागेषु बहवः अभ्यर्थिनः भागं गृहीतवन्तः। काउंसलिङ्ग-प्रक्रियायां शैक्षणिक-योग्यता, अनुसन्धान-प्रस्तावः तथा साक्षात्कारः आधाररूपेण अभ्यर्थिनां मूल्याङ्कनं कृतम्। प्रशासनानुसारं एतेषां विभागानां वरीयता-सूच्यः अपि शीघ्रं प्रकाशिताः भविष्यन्ति।

# हिमाचलसर्वकारस्य वार्षिकपञ्चाङ्गस्य मुख्यमंत्रिणा कृतं विमोचनम्



**हिमसंस्कृतवार्ताः - शिमला।** मुख्यमंत्री सुखविंदरसिंहसुक्खुः मङ्गलवासरे राज्यसर्वकारस्य २०२६ वर्षस्य पञ्चाङ्गानां विमोचनं कृतवान्। एतेषु पञ्चाङ्गेषु राज्यसर्वकारस्य विविधजनकल्याणविकासयोजनानां दर्शनं प्राप्यते। अस्मिन्नवसरे मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः अवदत् यत् सर्वकारस्य प्रमुखे पञ्चाङ्गे"चिट्टा-मुक्त-हिमाचलम्" इति विषयाधारितं पञ्चाङ्गम् हिमाचलसर्वकारस्य मादकद्रव्य-रहित-हिमाचलस्य प्रतिबद्धतां दृढतया प्रदर्शयति | अस्मिन् अवसरे मुख्यमंत्रिणा हिमाचलप्रदेशभवनादिसन्निर्माणकर्मककल्याण-मण्डलस्य पञ्चाङ्गमपि विमोचितम्।मुख्यमंत्री सुक्खुः अवदत् यत् जनहितं सामाजिकचिन्तानां च प्रतिबिम्बं कुर्वन्तः एते पञ्चाङ्गाः अस्माकं प्राथमिकतानां प्रतीकाः सन्ति।



# मादकद्रव्यस्य दुरुपयोगविरुद्धं युद्धं कुर्वतीनां महिलानां विरुद्धं प्राथमिकीपञ्जीकरणं लज्जाजनकम् - जयरामठाकुरः

हिमसंस्कृतवार्ताः - बिलासपुरम्। राज्ये वर्धमानस्य मादकद्रव्यस्य संकटानां, मादकद्रव्यव्यापारिणां सर्वकारेण रक्षणस्य, बिलासपुरे मादकद्रव्यस्य दुरुपयोगस्य निवारणाय राज्ये निरीक्षणं कुर्वतीनां महिलानां विरुद्धं पञ्जीकृतप्रकरणानाम् विरोधे पूर्वमुख्यमन्त्री विपक्षस्य नेता च जयरामठाकुरः बिलासपुरभाजपायाः सहभागी अभवत्। सः स्वपञ्चायतेषु निरीक्षणं कुर्वतीनां महिलामण्डलस्य केषाञ्चन महिलानां विरुद्धं पञ्जीकृत-पुलिसप्रकरणं दुर्भाग्यपूर्णं वर्णयित्वा तस्य निवृत्तेः आग्रहं कृतवान्। अस्मिन् विषये ते बिलासपुरस्य मुख्यविपणीतः उपायुक्तकार्यालयं प्रति विरोधयात्रायाः नेतृत्वं कृत्वा मुख्यमन्त्रिणं प्रति, उपायुक्तस्य माध्यमेन, महिलानां विरुद्धं प्रकरणानाम् निवृत्तेः अनुरोधं कृत्वा ज्ञापनपत्रं प्रदत्तवन्तः।जयरामठाकुरः अवदत् यत् सर्वकारः मादकद्रव्यस्य दुरुपयोगस्य विषये यथार्थतया गम्भीरः नास्ति, तस्य विरुद्धं युद्धे गम्भीरताम् प्रदर्शयितुं स्थाने प्रख्यापनं (शो-ऑफ), आयोजनप्रबन्धनं (इवेण्ट मैनेजमेण्ट) च प्रवृत्तः अस्ति। राज्ये दिने दिने मादकद्रव्यस्य दुरुपयोगः वर्धमानः इति विपक्षनेता अवदत्। यत्र मानवस्य प्राप्तिः अशक्या अस्ति तत्र मादकद्रव्याणि प्राप्नुवन्ति। राज्यस्य प्रत्येकस्मिन् क्षेत्रे मादकद्रव्यस्य दुरुपयोगः विनाशं जनयति। अस्माकं युनः प्रतिदिनं मादकद्रव्यस्य अतिमात्रायाः कारणेन वीथिषु अकालं म्रियन्ते। एताः परिस्थितयः हृदयविदारकाः सन्ति। परन्तु मादकद्रव्यव्यापारिणां विरुद्धं स्वशक्तिं दर्शयितुं स्थाने मादकद्रव्यस्य दुरुपयोगस्य विरुद्धं स्वरं उत्थापयन्तः महिलाः सर्वकारः लक्ष्यं करोति। सः पृष्टवान् यत् एषा स्थितिः किमर्थम् उत्पन्ना यत्र महिलाः स्वपञ्चायतानां रक्षणं कर्तुं बाध्यन्ते। एतत् सर्वकारस्य व्यवस्थायाः च असफलता अस्ति। साधारणाः जनाः तत् कार्यं कुर्वन्ति यत् पुलिसैः कर्तव्यं, तस्य स्थाने ते अभियोजनस्य सम्मुखीभवन्ति।जयराम ठाकुरः अवदत् यत् अस्मिन् सम्पूर्णे विषये पुलिसस्य कार्यप्रणालीविषये गम्भीराः प्रश्नाः उत्थापिताः सन्ति। यदा महिलाः मादकद्रव्यस्य दुरुपयोगस्य विषये पुलिसं प्रति सूचनां दत्तवन्तः तदा पुलिसद्वारा किमर्थं तत्स्थाने न प्राप्तवन्तः? ग्रामस्य गुल्मेषु मादकद्रव्यस्य सूच्यौषधस्य मालाः मुक्ततया दृश्यन्ते। एषा नित्यघटना। समाजः मादकद्रव्यस्य दुरुपयोगस्य विरुद्धं युद्धस्य समर्थनं कुर्वन् अस्ति। परिवाराः समर्थनं कुर्वन्ति। राज्यस्य जनाः समर्थनं कुर्वन्ति तर्हि सर्वकारः किमर्थम् एतत् करोति ? यदि मातरः स्वसन्ततिं मादकद्रव्यस्य दुरुपयोगात् उद्धारयितुं अग्रे गन्तुं बाध्यन्ते तर्हि मुख्यमन्त्री सर्वकारेण च एतस्याः स्थितिः विचारणीया। एषा अतीव दुर्भाग्यपूर्णा स्थितिः अस्ति। अस्मिन् विषये सर्वकारेण गम्भीरतापूर्वकं चिन्तनस्य आवश्यकता वर्तते, मादकद्रव्यस्य दुरुपयोगस्य विरुद्धं युद्धे केवलं आयोजनस्य, शीर्षकस्य च प्रबन्धनात् परं कार्यं कर्तुं आवश्यकता वर्तते। स्वस्य कार्यकालस्य विषये चिन्तयन् सः अवदत् यत् राज्ये औषधव्यापारे सम्बद्धाः अधिकांशः जनाः अन्यराज्येभ्यः एव सन्ति, अतः पूर्वसर्वकारे वयं समीपस्थैः राज्यैः सह सहकार्यं कर्तुं निश्चयं कृतवन्तः। समीपस्थराज्यानां मुख्यमन्त्रिणः विश्वासे गृहीत्वा वयं यत् अभियानं प्रारब्धवन्तः तत् अतीव लाभप्रदं सिद्धं जातम्, प्रभावीरूपेण च मादकद्रव्यस्य दुरुपयोगं नियन्त्रितवान्। सर्वेषां मुख्यमन्त्रिणां उत्तरदायी उच्चपदाधिकारिणां च मध्ये तिस्रः सभाः अभवन् | परन्तु वर्तमानसर्वकारस्य त्रिवर्षीयकार्यकाले एतादृशी एकापि सभा न अभवत् |

# IGMC SHIMLA QUARREL - कण्ठाश्लेषेण विवादस्य समाप्तिः, द्वयोः पक्षयोः आईजीएमसी विग्रहप्रकरणे सहमतिः



**हिमसंस्कृतवार्ताः - शिमला।**

आईजीएमसी-संस्थाने वैद्यस्य रोगिणः च विवादः अन्ततः सौहार्दपूर्णतया निराकृतः अस्ति । मंगलवासरे सचिवालये एकस्याः सभायाः समये डॉ. राघवनिरुला, रोगी अर्जुनसिंहः च परस्परं क्षमायाचनां कृत्वा विवादस्य समाप्त्यर्थं सहमतौ अभवताम्। उभयपरिवारस्य सदस्याः, चौपालक्षेत्रस्य प्रतिनिधिमण्डलं, वरिष्ठाः सर्वकारीयाधिकारिणः च उपस्थिताः आसन् ।सभायाः अनन्तरं डॉ. राघवनिरुला, रोगी अर्जुनसिंहः च कण्ठाश्लेषं कृत्वा क्षमायाचनां कृतवन्तौ, येन दीर्घकालीनः विवादः शान्तिपूर्वकं समाप्तः। एतत् सचिवालयस्य मुख्यमन्त्रिणः मीडियापरामर्शकस्य नरेशचौहानस्य कक्षे अभवत्, तस्य हस्तक्षेपेण पक्षद्वयस्य मध्ये पञ्जीकृतं पुलिसप्रकरणम् अधुना निरस्तः भविष्यति। २२ दिसम्बर् दिनाङ्के आईजीएमसी-चिकित्सालयस्य फुफ्फुसचिकित्साविभागस्य वार्डे एकस्य रोगी-वैद्ययोः मध्ये विग्रहः अभवत् ।अस्याः घटनायाः चलचित्रं सामाजिकमाध्यमेषु प्रसृतम् अभवत्, येन एषः विषयः चर्चायाः विषयः अभवत् । अस्य विषयस्य अन्वेषणार्थं सर्वकारेण समितिः निर्मिता । समितेः प्रतिवेदनस्य अनन्तरं सर्वकारेण डॉ. निरुला इत्यस्य सेवाः समाप्ताः। चिकित्सालये निवासी वैद्याः एकदिवसीयसामूहिक-आकस्मिक-अवकाशं, द्विदिवसीय-विरोधप्रदर्शनं च कृतवन्तः, येन चिकित्सालयस्य सेवासु महत्त्वपूर्णः प्रभावः अभवत् । परन्तु मंगलवासरे उभयपक्षेण भविष्ये सहकार्यस्य आश्वासनं दत्तम्। डॉ. राघवनिरुला उक्तवान् यत् उभयपक्षः आरम्भादेव विषयस्य समाधानं कर्तुम् इच्छति स्म, परन्तु पद्धतयः भिन्नाः आसन्। "वयं पुनः एतादृशी स्थितिः न भवतु इति इच्छामः, सर्वेषां समर्थनस्य आवश्यकता अस्ति।"

## "घटना दुर्भाग्यपूर्णा आसीत्"-डॉ. राघवनिरुला

डॉ. राघवनिरुला इत्यनेन उक्तं यत्, "दिसम्बर-मासस्य २२ दिनाङ्के या घटना अभवत् सा अत्यन्तं दुर्भाग्यपूर्णा आसीत् । तदर्थं वयं द्वौ अपि परस्परं क्षमायाचनां कुर्वः। राज्यस्य जनेभ्यः अपि क्षमायाचनाम् कुर्वः। भविष्ये कस्यचित् कृते एतत् न भवतु इति वयं सुनिश्चितं करिष्यामः।

## रोगी अर्जुनसिंहः अपि क्षमायाचनां कृतवान्

रोगी अर्जुनसिंहः अवदत् यत् "यदा वैद्यः क्षमायाचनां कृतवान् तदा वयं के स्मः यत् न क्षन्तारः? वयम् अपि क्षमामः।" सर्वकारः, सामान्यजनः, चौपालस्य जनाः च अस्मान् पूर्णतया समर्थनं कृतवन्तः । कस्यचित् रोगी वा अन्यस्य वा यत्किमपि असुविधा भवति तदर्थं अहं हार्दिकतया क्षमायाचनां करोमि। अर्जुनः अपि लघुहृदयस्वरेण अवदत् यत् वैद्यः शीघ्रमेव विवाहं करिष्यति, यदि आमन्त्रितः स्यात् तर्हि कदाचित् अहमपि तत्र भविष्यामि इति।

## डॉ. राघवस्य माता अवदत्- "अर्जुनः पुत्रवत् अस्ति।"

डॉ. राघवनिरुला इत्यस्य माता अवदत्, "अहं कस्यचित् दोषं दातुम् न इच्छामि। उभौ बालकौ क्षमायाचनां कृतवन्तौ, अस्माभिः सह च स्तः। अर्जुनः अपि मम कृते पुत्रवत् अस्ति। उभयपक्षं एकत्र आनयन् सर्वकारेण महत् कार्यं कृतम्। अस्य कृते वयं सर्वकारस्य अतीव कृतज्ञाः स्मः।

## यदि तस्मिन् समये विषयः निराकृतः स्यात् तर्हि एषः एतावत् महत् विषयः न स्यात् - नरेशचौहानः

मुख्यमंत्रिणः मीडियापरामर्शकः नरेशचौहानः अवदत् यत् 22 दिसम्बर् दिनाङ्के आईजीएमसी इत्यत्र या घटना अभवत् सा अत्यन्तं दुर्भाग्यपूर्णा अस्ति। यदि तदा प्रकरणस्य समाधानं जातम् आसीत् तर्हि एतादृशः महत् विषयः न स्यात् । सः अवदत् यत् मुख्यमन्त्री वैद्यैः सह मिलित्वा पुनः अन्वेषणस्य आश्वासनं दत्तवान्, अपि च वार्ताद्वारा विरोध-प्रदर्शनस्य समाप्तिः अभवत्। वयं वैद्यान् व्याख्यातवन्तः यत् संवादः एव एकमात्र समाधानं, यतः एषः विषयः राज्यस्य रोगिणां स्वास्थ्यसेवानां च विषये आसीत् । नरेशचौहानः अवदत् यत् डॉ. राघवस्य रोगिणः अर्जुनस्य च मध्ये स्थायिवैरभावः नास्ति; अस्थायी विवादः आसीत् । तौ महत् हृदयं दर्शयित्वा सहमतिं प्राप्तवन्तौ। सहमति-आधारेण एफआइआर-पत्रं अपि निरस्तं कर्तुं वयं प्रयतेम।

# डीएवी पब्लिक विद्यालये महेशखूंट इत्यत्र संस्कृतहिन्दीविषययोः क्षमतावर्धनकार्यशाला सम्पन्ना









**हिमसंस्कृतवार्ताः- डॉ विमलेश झा भागलपुर, बिहार**

डीएवी शैक्षिक उत्कृष्टता केन्द्र, नवदेहलीइत्यस्य तत्त्वावधाने डीएवी पब्लिक विद्यालय, बिहार- सी, डी, आई प्रक्षेत्राणां निर्देशने डीएवी पब्लिक विद्यालय, महेशखूंट, खगड़िया (बिहार) इत्यत्र संस्कृतहिन्दीशिक्षकाणां द्विदिवसीया क्षमतावर्धनकार्यशाला सफलतया आयोजिता अभवत्। अस्यां कार्यशालायां डीएवीसंस्थायाः बिहारराज्यस्य सी, डी, आई इति त्रयाणां प्रक्षेत्राणां विद्यालयेभ्यः संस्कृतविषये पंचाशतशिक्षकाः तथा हिन्दीविषये शताधिकशिक्षकाः सहभागितां कृतवन्तः। कार्यशालायाः उद्घाटनं विद्यालयस्य प्राचार्यः हिमांशुशरणः, डीएवी पब्लिक स्कूल, मधेपुरा इत्यस्य प्राचार्यः डॉ. दीनबन्धु शरणः, डीएवी पब्लिक स्कूल, सहरसा इत्यस्य प्राचार्यः संजयकुमारः, उभयोः विषययोः प्रशिक्षकैः सह दीपप्रज्वलनपूर्वकं कृतवन्तः। एतस्य कार्यशालायाः उद्देश्यानि संस्कृतहिन्दीभाषयोः शिक्षणे रोचकतायाः उत्पादनं, शिक्षणदक्षतायाः सुदृढीकरणं, नवीनशिक्षणाधिगमविधीनां ज्ञानं च आसीत्। अवसरे अस्मिन् विद्यालयस्य प्राचार्यः हिमांशुशरणमहाशयः स्वसम्बोधने उक्तवान् यत् संस्कृत- हिन्दीभाषे न केवलं भाषाशिक्षणाय एव स्तः अपि तु एते उभे सांस्कृतिकचेतनायाः,नैतिकमूल्यानां, भारतीयज्ञानपरम्परायाः संवाहिके स्तः। सः आशां प्रकटितवान् यत् अस्मिन् प्रशिक्षणकार्यक्रमे शिक्षकाः शिक्षणे नवीनकुशलतां प्राप्य छात्राणां सर्वांगीणविकासाय सिद्धाः भविष्यन्ति। संस्कृतविषये वीरेन्द्रकुमारसिंहः, डॉ. विमलेशझा, श्यामाचरणः, डॉ. विभूनारायण पाण्डेयः, अवधेशकुमार तिवारी इत्यादयः प्रशिक्षकाः, हिन्दीविषये संजयकुमार झा, रागिनी दूबे, कविता कुमारी, मनु उपाध्यायः, योगेशगुप्ता, अंजू सिंह, नन्दकिशोर ठाकुर, विजयकुमार उपाध्यायः, चन्द्रभूषणपाण्डेय, रेमी कुमारी, सत्येन्द्रकुमार इत्यादयः प्रशिक्षकाः शिक्षकेभ्यः नवीनशिक्षणविधीनां, नवाचारानां, भाषाकौशलविकासस्य च विषये प्रशिक्षणं दत्तवन्तः। संस्कृतभाषायां प्रशिक्षकैः विशेषतया संस्कृतशिक्षणे रुच्युत्पादनविधयः, भाषाकौशलानि, संस्कृतप्रश्नपत्रनिर्माणं, पद्यशिक्षणं, संस्कृतशिक्षणे सततविकासलक्ष्यस्य उपयोगिता, त्रुटिविश्लेषणम्, अंकाधिकागमविश्लेषणं, सन्धिशिक्षणस्य नवीनविधयः इत्यादिषु विषयेषु विस्तरेण चर्चा कृता। प्रशिक्षणस्य समापनसत्रे सर्वेषां प्रशिक्षकानां सम्मानम् अपि अभवत्। अपि च सर्वेभ्यः प्रतिभागिभ्यः प्रमाणपत्राणि प्रदत्तानि। एषा कार्यशाला डीएवी पब्लिक स्कूल, आईओसी, बरौनी इत्यस्य प्राचार्यः सह सहायक क्षेत्रीय अधिकारी कमलकिशोर सिन्हा, डीएवी पब्लिक स्कूल, बरारी, भागलपुरविद्यालयस्य प्राचार्यः सह सहायक क्षेत्रीय अधिकारी अनिल कुमारः, डीएवी पब्लिक स्कूल, इटवानगर, बेगूसरायविद्यालयस्य प्राचार्या सह सहायक-क्षेत्रीय अधिकारिणी सविता इत्येषां मार्गदर्शने सफलतया सम्पन्ना अभवत्। कार्यशालायाः सफल-सञ्चालने विद्यालयस्य सर्वेषां शिक्षकशिक्षिकाणां, शिक्षकेतरकर्मचारिणां योगदानम् अत्यन्तं प्रशंसनीयम् आसीत्।

# संस्कृतभारत्याः काशीप्रान्तस्य प्रबोधनवर्गस्य समापन-दीक्षान्तकार्यक्रमः सुसम्पन्नः जातः




**हिमसंस्कृतवार्ता - जगदीश डाभी।** कार्यक्रमेऽस्मिन् मुख्यातिथिरूपेण काशीविश्वनाथमन्दिरस्य मुख्यकार्यपालनाधिकारिणः श्रीविश्वभूषणमिश्रवर्याः आसन्। कार्यक्रमस्य अध्यक्षतां सान्दिपनि-वेदविद्या-प्रतिष्ठानस्य उपाध्यक्षाः प्रो० हृदयरञ्जनशर्मवर्यैः कृतम्। मुख्यवक्तृरूपेण श्रीसोमनाथ-संस्कृत-विश्वविद्यालयस्य कुलपतिचराः प्रो० गोपबन्धुमिश्रमहाभागाः समुपस्थिताश्चासन्। प्रास्ताविक-भाषणं संस्कृतभारत्याः प्रान्तमन्त्री श्रीनागेशपाण्डेयमहोदयेन कृतम्। धन्यवादज्ञापनं संस्कृतभारत्याः काशीप्रान्ताध्यक्षः प्रो० रामनारायण द्विवेदीवर्येण कृतम्। प्रबोधनवर्गस्य आयोजनं संस्कृतभारत्याः क्षेत्रसङ्घटनमन्त्री श्रीप्रमोदपण्डितवर्यः एवं प्रो. रामनारायणद्विवेदी महोदयस्य निर्देशने जातम्। मुख्यातिथयः श्रीविश्वभूषणमिश्रवर्यैः उक्तं यत् भारतीयसंस्कृतिः संस्कृतभाषायामेव निहिता अस्ति। तथा च विश्वेस्मिन् सर्वाधिका व्यवहृत्यमाणा भाषा संस्कृतमेव अस्ति। संस्कृतं स्वजीवने आचरन्तु अवतारयन्तु च । निरन्तरं संस्कृतप्रचाराय प्रसाराय प्रयासः अस्माभिः करणीयः इति मुख्यवक्तृत्वपदं अलङ्कुर्वन्तः प्रो. गोपबन्धुमिश्रवर्यैः कथितम्।

अध्यक्षीय उद्बोधने प्रो० हृदयरञ्जनशर्ममहोदयैः कथितं यत् भारतीय-ज्ञान-परम्परायाः संवाहिका भाषा संस्कृतभाषा एवास्ति। कार्यक्रमस्य सञ्चालनं वर्गार्थी चिरञ्जिवमिश्रेण कृतम्। वर्गार्थिन्या सत्यया दिव्यया च गीतं प्रस्तुतम्। कार्यक्रमेस्मिन् समागतानाम् अतिथीनां परिचयं स्वागतञ्च डॉ. शालिग्रामत्रिपाठी वर्येण कृतम्। दीक्षान्तसमारोपकार्यक्रमस्य आचरणं 30/12/2025 दिनाङ्के प्रातःकाले सञ्जातम्। कार्यक्रमेस्मिन् प्रामुख्यतया डाॅ. अशोकचौधरी, डॉ. अमरचन्द्रठाकुरः, डॉ. शैलेन्द्रदिक्षितवर्यः, श्रीरामपाण्डेयः, श्रीविमलपाण्डेयः, शिवमः, विवेकः ओमशुक्लः, राजनः इत्यादयः उपस्थिताः आसन्।

# भारतीयनौसेना स्वस्य कलवारीवर्गस्य पनडुब्बीनां कृते ४८ भारयुतानां टार्पीडो-सम्बद्धानां उपकरणानां च क्रयणं करिष्यति

भारतीयनौसेना स्वस्य कलवारीवर्गस्य पनडुब्बीनां कृते ४८ भारयुतानां टार्पीडो-सम्बद्धानां उपकरणानां च क्रयणं करिष्यति । अस्य कृते इटलीदेशस्य वास् सबमरीन् सिस्टम्स् एसआरएल इत्यनेन सह प्रायः १,८९६ कोटिरूप्यकाणां अनुबन्धः कृतः अस्ति । रक्षामन्त्रालयेन मंगलवासरे ४.२५ लक्षाधिकानां निकटचतुर्थांशयुद्धकारबाइनानाम् ४८ भारयुतानां टार्पीडोणां च क्रयणार्थं ४६६६ कोटिरूप्यकाणां अनुबन्धः कृतः। मन्त्रालयेन सूचितं यत् भारतफोर्जेलिमिटेड्, पीएलआर सिस्टम्स् प्राइवेट् लिमिटेड् इत्यनेन सह २७७० कोटिरूप्यकाणां व्यापारः कृतः अस्ति। अस्य अन्तर्गतं युद्धकारबाइनाः आवश्यकाः उपसाधनाः च क्रियन्ते । भारतीयनौसेना स्वस्य कलवारीवर्गस्य पनडुब्बीनां कृते ४८ भारीनां टार्पीडो-सम्बद्धानां उपकरणानां च क्रयणं करिष्यति । अस्य कृते इटलीदेशस्य वास् सबमरीन् सिस्टम्स् एसआरएल इत्यनेन सह प्रायः १,८९६ कोटिरूप्यकाणां अनुबन्धः कृतः अस्ति ।



# शिक्षामन्त्रालयेन पीएम-युवा योजनाप्रतियोगितायाः

## तृतीयचरणस्य परिणामाः घोषिताः

प्रधानमन्त्रिणः युवा लेखकमार्गदर्शनयोजनायाः पीएम-युवा इत्यस्य अन्तर्गतं तृतीयचरणस्य प्रतियोगितायाः परिणामाः शिक्षामन्त्रालयेन घोषिताः। २२ भारतीयभाषासु आङ्ग्लभाषायां च त्रयचत्वारिंशत् पुस्तकप्रस्तावानां चयनं कृतम् । मन्त्रालयेन उक्तं यत् चयनितपुस्तकप्रस्तावाः षड्मासाभ्यन्तरे पुस्तकरूपेण विकसिताः भविष्यन्ति। मन्त्रालयेन उक्तं यत् प्रत्येकं चयनितलेखकं प्रतिमासं पञ्चाशत् सहस्ररूप्यकाणां छात्रवृत्तिः, प्रकाशितपुस्तके १० प्रतिशतं आजीवनं रॉयल्टी च प्राप्स्यति। पीएम-युवा इत्यस्य तृतीयचरणस्य अन्तर्गतं पुस्तकानां प्रथमसमूहः आगामिवर्षे प्रकाशितः भविष्यति, यस्य उद्देश्यं भारते विदेशे च देशस्य साहित्यस्य विचाराणां च प्रतिनिधित्वं कुर्वतां लेखकानां नूतनपीढीं प्रोत्साहयितुं भविष्यति




# "लौकिकन्यायकोशः"

## "घटीयन्त्रस्थितघटभ्रमणन्यायः"

श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः। स च वायुः सूर्योदयमारभ्य सार्धघटिकाद्वयं घटीयन्त्रस्थित-घटभ्रमणन्यायेन एकैकस्यां नाड्यां भवति। एवं सति अहर्निशं श्वासप्रश्वासयोः षट्छताधिकैकविंशतिसहस्राणि जायन्ते। सर्वदर्शनसंग्रहस्य पातञ्जलदर्शने अस्य प्रयोगः कृतः।

**डा वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्**



हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः

# वार्ता-संवादः

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

काव्या- नमस्ते नन्दिनि। आदौ श्रूयताम्, अन्तर्जाले एका विचित्रा चर्चा प्रवृत्ता। एकेन जनेन लिखितं यत् अस्माकं भारतवर्षे सेवानिवृत्तौ पञ्चकोटि-रुप्यकाणि अपि पर्याप्तानि न सन्ति इति। एतद् श्रुत्वा जनैः महती चर्चा आरब्धा।

नन्दिनी- सत्यम्, एतत् चिन्तनीयम्। किन्तु अग्रे श्रूयताम्। कस्मिंश्चित् विवाहे सिन्दूर-दानस्य समये सिन्दूर-पात्रं रिक्तम् अभूत्। वर-वधू-पक्षौ चिन्तितौ। किन्तु 'ब्लिङ्किट्' (Blinkit) सेवया कैश्चित् निमेषेषु एव सिन्दूरम् आनीतम्। विवाह-कार्यं निर्विघ्नं सम्पन्नम्।

काव्या- अतीव रोचकं खलु! अस्य द्रुत-वाणिज्यस्य प्रशंसा अपरेण अपि कृता। देहल्यां निवसता एकेन अमेरिका-युवकेन उक्तं यत् तेन षड्-निमेषेषु एव सामग्री प्राप्ता। एतत् दृष्ट्वा सः आश्चर्यचकितः जातः।

नन्दिनी- भारतस्य व्यवस्था तु बहु-शीघ्रा अस्ति! किन्तु इटली-देशस्य पर्वतेषु स्थिते एकस्मिन् ग्रामे 'विलम्बेन' किञ्चित् सुखदं जातम्। तत्र त्रिंशत्-वर्षेषु प्रथम-वारम् एकः शिशुः जातः। तेन ग्रामेण महान् उत्सवः आचरितः।

काव्या- एषा तु अति-आनन्दस्य वार्ता। अद्य एतावत् एव। नमो नमः।

# कम्बलवन्तं हरिं मत्वा पश्य, वैकुण्ठे शेषतल्पे हरिश्शेते

वैकुण्ठे शेषतल्पे हरिश्शेते, हरिणा सह लक्ष्मीः तत्र अस्ति। सनक- सनन्दादि-ऋषयः यदा मत्वा तदा तत्र गच्छन्ति। तान् अनुमतिम् अस्ति। उत्तरद्वारं तेषां कृते सर्वदा उद्घाटितम् अस्ति।